## (520) " चिञ् चयने " (X-चुरादिः-1630. सक. सेट्. उभ.)

### ज्ञपादिः मित्संज्ञकश्च । [अ]

[1]चपकः-पिका, चयकः-यिका, चिचपयिषकः-चिचययिषकः-षिका, [2]चायकः-यिका ;

चपयिता-चययिता-त्री, चिचपयिषिता-चिचययिषिता-त्री, चेता-त्रीः ;

[3]प्रणिचपयन्-प्रनिचययन्-न्ती, चिचपयिषन्-चिचययिषन्-न्ती, चयन्-न्ती ;

चपयिष्यन्-चययिष्यन्-न्ती-ती, चिचपयिषिष्यन्-चिचययिषिष्यन्-न्ती-ती, चेष्यन्-न्ती-ती ;

चपयमानः-चययमानः, चिचपयिषमाणः-चिचययिषमाणः, चयमानः ;

चपयिष्यमाणः-चययिष्यमाणः, चिचपयिषिष्यमाणः-चिचययिषिष्यमाणः, चेष्यमाणः ;

[4]विचत्-विचतौ-विचतः, चप्-चपौ-चपः ;

चपितः-चयितः, चिचपयिषितः-चिचययिषितः, चितम्-तः-तवान् ;

चपः-चयः, चिचपयिषुः-चिचययिषुः, चयः ;

चपयितव्यम्-चययितव्यम्, चिचपयिषितव्यम्-चिचययिषितव्यम्, चेतव्यम् ;

चपनीयम्-चयनीयम्, चिचपयिषणीयम्-चिचययिषणीयम्, चयनीयम् ;

---

[अ] अस्य धातोः ञित्करणसामर्थ्याण्णिचो वैकल्पिकत्वं बोध्यते। णिजभावपक्षेऽपि शतृ-शानचौ भवतः ञित्करणात्। णिजभावपक्षे धातोः हलादित्वात् एकाच्त्वाच्च यङि—**चेचीयकः** इत्यादीनि सर्वाण्यपि रूपाणि स्वादिगणपठितचिनोतेरिव (519) बोध्यानि। तथा सन्नन्तेऽपि **चिचीषकः-षिका, चिकीषकः-षिका** ; इत्यादीनि सर्वाण्यपि रूपाणि ज्ञेयानि।

1. 'चिस्फुरोर्णौ' (6-1-54) इत्यात्वविकल्पः। आत्वपक्षे, आदन्तलक्षणे पुगागमे, ज्ञपादिपञ्चकपाठेन मित्त्वात्, णौ उपधायाः 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वः। आत्वाभावपक्षे, वृद्धौ, आयादेशे ह्रस्वे च रूपम्। एवं ण्यन्ते सर्वत्र रूपद्वयस्योपपत्तिर्ज्ञेया।

2. ञित्करणसामर्थ्याण्णिचो वैकल्पिकत्वेन णिजभावपक्षे शुद्धाद्धातोः **चायकः-यिका** इत्यादीनि रूपाणि प्रदर्शितानि।

3. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति नेः णत्वविकल्पः।

4. अत्र यकारस्य वलि लोपे, 'ह्रस्वस्य पिति कृति—' (6-1-71) इति तुगागमः। न च स्थानिवद्भावः शङ्क्यः ; यलोपे तन्निषेधात्।